# Vetalabhairavabhyam Kritam Shiva Stotram

# વેતાલભૈરવાભ્યાં કૃતં શિવસ્તોત્રમ્

## Document Information

Text title : Vetalabhairavabhyam Kritam Shiva Stotram

File name : shivastotramvetAlabhairavAbhyAMkRRitaM.itx

Category : shiva, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : Kalikapurana Adhyaya 51 shloka 179-198

Latest update : January 15, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 15, 2022

*sanskritdocuments.org*

Vetalabhairavabhyam Kritam Shiva Stotram

# વેતાલભૈરવાભ્યાં કૃતં શિવસ્તોત્રમ્

વેતાલભૈરવાવૂચતુઃ
પઞ્ચવક્ત્રં મહાકાવ્યં સર્વજ્ઞાનમયં પરમ્ ।
સંસારસાગરત્રાણં પ્રણમાવો વૃષધ્વજમ્ ॥ ૧૭૯॥

ત્વં પરઃ પરમાત્મા ચ પરેશઃ પુરુષોત્તમઃ ।
ત્વં કૂટસ્થો જગદ્વ્યાપી પ્રધાનઃ પરમેશ્વરઃ ॥ ૧૮૦॥

રૂપાત્મા ત્વં મહાતત્ત્વં તત્ત્વજ્ઞાનાલયઃ પ્રભુઃ ।
સાઙ્ખ્યયોગાલયઃ શુદ્ધો ગુણત્રયવિભાગવિત્ ॥ ૧૮૧॥

ત્વં નિત્યસ્ત્વમનિત્યશ્ચ જગત્કર્તા લયઃ સ્મૃતઃ ।
એકોઽનેકસ્વરૂપશ્ચ શાન્તચેષ્ટો જગન્મયઃ ॥ ૧૮૨॥

નિર્વિકારો નિરાધારો નિત્યાનન્દઃ સનાતનઃ ।
ત્વં વિષ્ણુસ્ત્વં મહેન્દ્રસ્ત્વં બ્રહ્મા ત્વં જગતાં પતિઃ ॥ ૧૮૩॥

યો રૂપરૂપેશ્વરરત્નમાલઃ સમ્ભૂતિભૂતો નિરવગ્રહશ્ચ ।
કાક્ષ્યાવતીર્ણાવગતપ્રમાથી યોગેશ્વરો જ્ઞાનગતિસ્ત્વગમ્યઃ ॥ ૧૮૪॥

પ્રમેયરૂપાત્મધરાધરાભો ભોગીન્દ્રબદ્ધામૃતભોગતન્ત્રઃ ।
સૂક્ષ્માક્ષરસ્તત્ત્વવિદપ્રમાથી ત્વં દેવદેવઃ શરણં સુરાણામ્ ॥ ૧૮૫॥

વિકલ્પમાનાપરિહીનદેહઃ શુદ્ધાન્તધામાનુગતૈકવિધઃ ।
વર્ધિષ્ણુરુગ્રઃ પુરુષઃ પરાત્મા ત્વમિન્દ્રિયૌઘસ્ય વિચારબુદ્ધિઃ ॥ ૧૮૬॥

ત્વં નાથનાથ પ્રભવઃ પરેષાં ગતિર્મુનીનાં પરયોગિગમ્યઃ ।
ત્વં ભૂધરો ભાગધરો હ્યનન્તો વિશ્વાત્મનસ્તે બહવઃ પ્રપઞ્ચાઃ ॥ ૧૮૭॥

જ્ઞાનામૃતસ્યન્દકપૂર્ણચન્દ્રો મોહાન્ધકારસ્ય પરઃ પ્રદીપઃ ।
ભક્તાત્મજાનાં પરમઃ પિતા ત્વં કામે ચ પઞ્ચાનનરૂપધારી ॥ ૧૮૮॥

શાસ્ત્રાખિલાનાં પ્રથમો વિવસ્વાંસ્તનૂનપાત્ ત્વં તનુષે ગુણૌઘાન્ ।

ત્વં બ્રહ્મરૂપેણ કરોષિ સૃષ્ટિં વિષ્ણુસ્વરૂપૈઃ સતતં સ્થિતિં ચ ॥ ૧૮૯॥

ત્વં રુદ્રરૂપી કુરુષે તથાન્તં ત્વત્તો ન ચાન્યજ્જગતીહ વસ્તુ ।
ત્વં રાત્રિનાથો દિવસેશ્વરશ્ચ ત્વમગ્નિરાપઃ પવનો ધરિત્રી ॥ ૧૯૦॥

નભસ્તથા ત્વં ક્રતુતન્ત્રહોતા ત્વમષ્ટમૂર્તિર્ભવતો ન ચાન્યત્ ।
અનન્તમૂર્તિસ્ત્વિહ મુખ્યભાવાન્નિગદ્યતે ચાષ્ટમયી ત્રિમૂર્તિઃ ॥ ૧૯૧॥

અનન્તમૂર્તે કથમન્યથા તે સઙ્ખ્યાસ્તિ રૂપસ્ય યદષ્ટમૂર્તિઃ ।
ત્વં ત્ર્યમ્બકસ્ત્વં ત્રિપુરાન્તકશ્ચ ત્વંશમ્ભુરીશઃ શમનો વિધાતા ॥ ૧૯૨॥

સહસ્રબાહુશ્ચ હિરણ્યબાહુઃ સહસ્રમૂર્તિસ્ત્વિહ પઞ્ચવક્ત્રઃ ।
પ્રભૂતનેત્રસ્તુ ષડર્દ્ધનેત્રઃ પ્રભૂતબાહુર્દશબાહુરીશઃ ॥ ૧૯૩॥

પ્રભૂતભોગી મિતભોગયુક્તો ભોગ્યાનુસારો નિરવગ્રહશ્ચ ॥ ૧૯૪॥

નિત્યાનિત્યસ્વરૂપાય નિત્યધામસ્વરૂપિણે ।
પરતત્ત્વસ્વરૂપાય નમસ્તુભ્યં શિવાત્મને ॥ ૧૯૫॥

નાન્તં લિઙ્ગસ્ય યસ્યામં વિષ્ણુના બ્રહ્મણા તવ ।
તસ્યાવાં કિં વિધાસ્યાવઃ સ્તુતિવાક્યં વૃષધ્વજ ॥ ૧૯૬॥

સ્વરૂપં યસ્ય જાનન્તિ ન દેવા નાપિ દાનવાઃ ।
આલાવાવાં કથન્તુ ત્વાં સ્તોષ્યાવઃ પરમેશ્વરઃ ॥ ૧૯૭॥

ભક્તિમાત્રેણ દેવેશ તવાવાં વૃષભધ્વજ ।
કુર્વઃ પ્રણામં ગૌરીશ ભૂયસ્તુભ્યં નમો નમઃ ॥ ૧૯૮॥

ઇતિ કાલિકાપુરાણે એકપઞ્ચાશત્તમાધ્યાયાન્તર્ગતં વેતાલભૈરવાભ્યાં
કૃતં શિવસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Vetalabhairavabhyam Kritam Shiva Stotram*
pdf was typeset on January 15, 2022

Please send corrections to *sanskrit@cheerful.com*